[2] the out-skirts of a town or village. एतानि पञ्च पुराणि; तथा वर्षं प्रति द्रम्म लक्ष ३ । एवं यदि नृपो मन्यते तदा प्रणामं करोमि । नृपेण मानितम् । मन्त्रिणा तत्कालं तन्नगरपरिसरे पञ्च ग्रामाणि तन्नाम्ना वासितानि । वीरमो मिलितः । नृपं प्रणम्य वीरमो **वाटके** स्थितः । वीसलदेवस्य राज्यं निष्कण्टकं जातम् । 67.20-22. [The word वाडो is used in this sense in the modern dialect of North Gujarāta.]

वाटिका f. an orchard. 24.25; 25.23; 49.24-25, 25, 28, 29; 50.16; 63.15; 65.12, 19; 105.6. *Vide* वाडि; also *vide* PK. वाटीकोट्ट.

वाटी f. a locality. रामचन्द्रस्तु नौवित्त**वाट्यां** वाणिज्याय यदपि तदप्यादाय याति । 26.31-32. *Vide* नौवित्तवाटी, पाटक, वाटक; also *vide* PK. वाटि.

वाडि f. an orchard. 114.18. cf. Guj. वाडी. *Vide* वाटिका; also *vide* PK. वाटीकोट्ट.

वाणउटी m. a sea-faring merchant. 78.28. cf. Guj. वहाणवटी.

वाणही f. a type of foot-wear, a chappal. सा भर्त्रा हक्किता शिक्षिता च । उक्तश्च—मद्गृहाद् याहि । सा **वाणही**मेकां पतितां मुक्त्वा एकां च पादे कृत्वा पितृगृहं गता । 9.12-13; छित्तिपस्तु शनैरपसृत्य 'कथमिहे'त्यार्यां **वाणही**तले इङ्गालेन लिखित्वा जनमप्रैषीत् । स उपानहं नृपायादर्शयत् । 20.9-10. [The word वाणही, derived from Skt. उपानह् > Pkt. उवाणह, वाणह, is fairly common in Old Guj. literature in exactly the same sense. *Vide e.g.*:

'मोगी मला ते घरि वीसमइ
चंदकिरणे रयणी नींगमइ ।
चंद्रन तणा विलेपन गमइ,
चरणे **वाणही** भली चमचमइ ॥'
—*Nala-Davadantī Rāsa* of Mahīrāja, verse 844;
'राय तणी दीठी **वाणही**, भूपति आव्यो इतो सही'
—Narapati's *Nandabatrīsī*, verse 50;
'तो पुण **वाणही** पगि पहिरवी'
—Śrīdhara's *Rāvaṇa-Mandodarī Saṃvāda*, verse 827.]

cf. Mod. Guj. वाणी (especially in the dialects of Saurāṣṭra); Mar. वाहण f., वाहाण f.

वाणिज्यकारक m. a (travelling) merchant who carried his goods in a caravan), 103.20. *Vide* PC. वणिज्याकार, PK. वणिज्यारक.

वात्सल्य n. *same as* सङ्घवात्सल्य. 75.25.

√वाद् to ring (for time). एकदा श्रीपत्तने द्वात्रिंशद्विहाराणां प्रतिष्ठां महदुत्सवेन प्रारब्धां श्रुत्वा वटपद्रपुरनिवासी वसाह कान्हाकः स्वयं कारितप्रासादबिम्बमादाय श्रीपत्तने प्रतिष्ठार्थमाययौ। हेमाचार्याः प्रतिष्ठार्थेऽभ्यर्थिताः। तैर्मानितम्। इतस्तस्मिन् दिने जनसम्मर्दो जातः। रात्रौ घटी मण्डिता। इतो वसाहस्य भोगाद्युपस्कारो विस्मृतः। तेन तमानीतुं गते लग्नघटी असमये **वादिता**। स आगतः। मध्ये प्रवेशं अलब्ध्वा लग्नघटीं श्रुत्वा विषण्णः। 44.27-30. cf. Guj. वागवुं, वाजवुं; Mar. वाजणें. *Vide* लग्नघटी.

वानीपात m. banditry. एताः स्त्रियो विभूषणपट्टकूलमौक्तिकादिभिर्विवर्जिताः कथम्?। केनापि दण्डिता **वानीपाते** पातिता वा; येनेदृशीनिःश्रीका दृश्यते। Int. 31. 19-20.

वापित adj. stocked. नूतनकपर्दिना रात्रौ स्वप्नं प्रदत्तम्—यदहो जावड! यस्मिन् पक्षेऽभ्रं दृश्यते तस्मिन्पक्षे प्रवहणानि चालनीयानि। अग्रे पुनः क्रयाणकं **वापितं** जावडेन। 101.7-8.

√वाफ् to dress by boiling in water. कस्यापि गोधूमक्षेत्रे कलिङ्गानि गृहीत्वा अरघट्टघटिकया **वाफयित्वा** रात्रौ यावद्भक्षितुं लग्नः... 46.11-12. cf. Guj. वाफवुं.

वायटीय adj. belonging to a section called वायट (Guj. वायड) गच्छ of the Śvetāmbara Jainas, hailing from the village वायट or वायड in North Gujarāta. [**वायटीय**]प्रासादे 126.25; **वायडज्ञातीय**मज्जाजैन ...78.28. *Vide* PC.; also *vide* PK. वायट.

वारक m. times. श्रीभोजराज**वारके** ('during the times of King Bhoja') नीलपटा दर्शनिन आसन्, 19.21; श्रीवीरधवल**वारके** 78.7. [Similar expressions are found in Old and mod. Guj.]

वारबेरज(?)गिरि m. हे तात! पर्वताधस्तादेते वाणिज्यकारका एतान् दिनान् किं स्थापिताः?। शुल्कमादाय किं न प्रेष्यन्ते?। तेन स्मित्वोक्तम्—एतत्परचक्रं मत्वा, मया त्वं दुर्गस्यैव मध्ये दत्ता। तव पुत्रोऽपि जातः। परमेतन्न याति। तां वार्त्तां श्रुत्वा तैर्नृपाग्रे उक्तम्। स निराशीभूय

गन्तुं प्रवृत्तः। स्वदलं प्रेषयत्। स दुर्गमवलोकयन् यदा गन्तुं लग्नः, तावता गवाक्षस्थितया बाकरीवेश्यया सूक्तमुक्तम्—'
गण्डूपदा किमधिरोहति मेरुशृङ्गं किं **वारबेरज(?)गिरौ** निरुणद्धिमार्गम्।
शक्येषु वस्तुषु बुधाः श्रममारभन्ते दुर्गग्रहग्रहिलतां त्यज शम्भलीश!॥ 103.20-25.

वारा f. delay, time, procrastination. तव मिथ्यात्वं गच्छतो **वारा** न लगति। 100.13. cf. Guj. वार f.; वार लागवी 'to delay'. *Vide* √लग् [7], वेला √लग्.

वार्ता f. [1] a rumour. सर्वत्र देश-देशान्तरे इयं **वार्ता**—यदुज्जयिन्यां सर्वं विक्रयमाप्नोति,। 2.21; मन्त्रिणा पुरान्त**र्वार्त्ता** कृता—यद्राणकः श्रीवीरधवल एति। 56.22.

[2] a news. अस्य पार्श्वात्पितृगृह**वार्त्तां** शृणोमि 4.20; श्रेष्ठिनातिथ्ये कृते **वार्त्ता** पृष्टा। 109.30.

[3] a report. सुन्दरं न कृतम्—यत्प्रथमतोऽप्यमी रुद्धाः। ममाग्रेऽपि **वार्त्ता** न कृता। 60.27-28.

[4] a suggestion. नृपेण देव्यां वचसा विसृष्टः। वर्षद्वयादनु तया सुरत्राणः समाकारितः। स भारं विमुच्य जरीदकेन धावितः (?)। नृपस्य कटकेन सह युद्धे जाते सुरत्राणो भग्नः प्रणष्टः। इतः सुरत्राणपत्न्या पतिं चिन्तातुरं विलोक्य उक्तम्—देवास्ये श्यामता कथम्?। सुरत्राणेनोक्तम्—युवत्यां **वार्त्तया** समागताः परं पश्चाद्गमने दुर्घटम्। 89.31-34.

[5] a conversation, a talk. भगिनीपतिना सह **वार्त्तां** कृत्वा शय्यायां गतः। 4.21, **वार्त्ता**प्रसङ्गादनु तयोक्तम् 23; **वार्त्तां** विदधतो रात्रिरजनि। 17.26; 20.8, सन्धे**र्वार्त्ता**मपि को न विधत्ते। 22; **वार्त्तां** कुर्वन् श्रुतः 39.4; सहजतो **वार्त्तां** कुर्वाणेन 78.12; इति **वार्त्तां** कुर्वतोर्द्वयोः 80.18-19; इतः सुरत्राणस्य मन्त्रिणो **वार्त्ता** जाता। 87.4; 103.22.

[6] a story. तव पिताऽपूर्वां **वार्त्तां** श्रुत्वा [v.l. वार्ता कथकाय] दीनारपञ्चशतीं ददाति। 5.29,30.

[7] a topic, a point. राज्ञा धूर्त्तत्वेन स्थितम्। पुनः कदाचिदेषा **वार्त्ता** कर्त्ता। 21.24. [A syntax peculiarity.]

[8] an affair. देवि! दण्डनायकस्य काऽप्यपूर्वा **वार्त्ता**। पाश्चात्ययामिन्यां 'एकेन्द्रियां [द्वीन्द्रिया]' इत्युक्तम्। प्रातर्युद्धं तथा कृतं यथा केनापि न क्रियते। 49.18-19; पण्डितेन आरक्षकः पृष्टः—नृपसभायां का **वार्त्ता**?। 81.19.

cf. Guj. वार्ता, वात; Hindi, Mar. वार्त्ता, बात.

वाल m. a small weight. 118.30. cf. Guj., Mar. वाल.

वालक m. a wire. उपानदेका प्रकटी जाता। स्वर्ण**वालक**गुम्फिता सर्वरत्नखचिता। 9.9. cf. Guj. वाळो.

वालही f. N. of a river flowing near Vāmanasthalī. 114.23-24.

वालीनाह m. a type of *vyantara*. इह देवकुल्यां **वालीनाहो**ऽस्ति। तस्य भूरियम्। अतः स पातयति। प्रातरुपवासं कृत्वा पूजोपचारमादाय तं ध्यायन्, **वालीनाहा**ग्रे उपविश।

यदि न मन्यते तदा खड्गं कर्षयित्वा वाच्यम्–याहि नो वा मारयिष्यामि । .... तथाकृते स आराटिं कृत्वा प्रणष्टः । तत्र देवकुल्यां क्षेत्रपालः स्थापितः । 52.15-19.

वालोर्व्या ind. with supplication; lit.: 'touching the earth with hair'? गतैः सर्वैरपि जीवैः सर्वानपि व्यापारान् कुरुते । ततो जीवेनोक्तम्–आयान्तु भवन्तः । अहं यामि । तथा कृतम् । जीवो वपुषो दूरे स्थित्वा स्थितः । ततः मृत इव स्थितः । **वालोर्व्या** (?) भणंत–को गरीयान् ? । तैरुक्तम्–भवान् । Int. 32.13–15.

वावि f. a step-well. 65.26. cf. Pkt. वावि, वावी; Guj. वाव; Hindī बावडी, बावरी, बावली; Mar. वाव, बाव.

वासक्षेप m. (consecration by) spraying scented powder (at the time of religious ceremonies). तैः सूरिभिर्धामदेव–सुमतिप्रभगणी **वासान्** दत्त्वा प्रहितौ । धामदेवगणिना **वासक्षेपः** कृतः । पश्चाद्देवगृहे निष्पन्ने श्रीजिनचन्द्रसूरयः स्वशिष्याः **वासान**र्पयित्वा प्रहिताः । तैश्च ध्वजारोपः कृतः । 31.12-14. [A Jaina technical term.] *Vide* PK.

वासण n. a vessel, a pot. तदनु द्रम्मसहस्र (२०००) **वासणे** प्रक्षिप्य एका त्रिपट्टदुकूला मङ्डिदेया । 49.27. cf. Deśī, Guj. वासण. *Vide* PC. for another sense.

वासित adj. [1] caused to crow. ततोऽर्बुदे तपस्यन्तीं तां तत्र रसीयाकनामा योगी ददर्श । प्रार्थितं तेनेति—यन्मम पत्नी भव । तयोक्तम्—द्वादशपद्या विधेहि एकरात्रिमध्ये । तेन तथाकृते श्रीमात्रा कृत्रिमकुर्कुटा **वासिताः** । कृत्रिमशुनश्चरणयोर्विलग्नाः । ततो हृदयस्फोटनेन स स्वयं विनष्टः । 85.6-8. [Skt. √वाश् to shriek, to sound. The root वास् in the sense of 'producing notes' is fairly prevalent in Old Guj. literature. *Vide e.g.: Prācīna Gurjara-Kāvyasaṅgraha*, part I, p. 101, line 20: मोर **वासइं**, सर्प नासइ; p. 120, line 7; *Vasantavilāsa*, verse 39:

रहि रहि तोरीय जोइलि कोइलि स्युं बहु **वास** ।
नीहुलउ अजीय न आवइ भावइ मूं न विलास ॥;

verse 49:

देसु कपूरची वासि रे **वासि** वली सरु एउ ।
सीवनं चांचं निरूपम रूपम पांखुडी बेउ ॥;

Prācīna Phāgu-saṅgraha, Phāgu 4, verse 9[cd]:

कोइल मधुर सु **वासइ**, त्रासइ पंथिय दूरि.;

Phāgu 21, verse 4; Phāgu 10, verse 11; Phāgu 36, verse 53:

रे कूकडा ! **वासि** म इणि रातिइ,
स्त्री जागिं तिवि करि रे कांइ ताति ?;

Phāgu 25, verse 2:

निशि अंधारी एकली, मधुर न **वासिसि** मोर,
विरह संतापि पापीउ, वालिंभ हईइ कठोर.]

cf. Guj. कागवास; Hindī बकवास.

[2] infused with, influenced by. भवतो मिथ्यात्व**वासित**स्य कलां न दृष्टि । श्रावकत्वमङ्गीकुरु । 91.16.

वासुपूज्य m. N. of the twelfth Jina born in Bhāratavarṣa. 27.11.

वाहग m. a traveller. 114.22.

वाहण n. a ship. केन दत्तेन तिष्ठति ?—देव ! स्तम्भतीर्थेन । व्यापारिणः पृष्टाः—तस्य किमायपदम् ? । तैरुक्तम्—द्रम्माणां सहस्र ३०, **वाहण** (शत ?) ३२ । 55.23-24; **वाहण**वस्तून्युत्तार्य 99.21. cf. Pkt. वाहण; Guj. वहाण. *Vide* वाहन.

वाहन n. *same as* वाहण. 57.1. *Vide* PC., PK.

वाहरा f. a succour, an aid, a help. प्रातः सूरयो विषादिताः । चित्तनिर्वृत्त्यर्थं **वाहरा** विहिता । 77.2; **वाहरायां** समागतायां पृष्टम्—अस्माकमश्वाः प्रविष्टा भविष्यन्ति । 102.10. cf. Pkt. वाहर; Guj. वार f., वहार f. *Vide* वहारा.

वाहिगि f. a maid-servant. 24.26, 27, 28, 29.

वाहिनी f. a type of palanquin. 8.11; 53.34; 59.30; 71.9; 107.30, 31; 108.2, 4; 122.29. *Vide* वहिला; also *vide* PK.

वाहीआलीकिसोर m. a young horse meant for riding. शिरश्छित्वा **वाहीआलीकिसोर**सप्तशती, शेषतुरगाश्वभाण्डागारम्, ... 40.1. *Vide* वाह्यालि; also *vide* PC. वाहवाह्यालि 'art of riding', PK. किशोर 'young one of a horse'.

वाह्यालि f. a royal procession (probably on horse-back). केनापि राज्ञा **वाह्यालि**गतेन कश्चित्पुमान् करीरशिखरस्थानि करीराणि विचिन्वन्नुदितः 113.1. *Vide* वाहीआलीकिसोर.

वि+आ+√कृ to utter, to ask. गुरुभि**र्व्याकृतः**—कस्त्वम् ? 105.32-33. *Vide* PK.

वि+आ+√घुट् to return, to turn back. एकदा कुलगुरुश्रीविजयसेनसूरयो वन्दापयितुमागताः । कुमारदेव्या नमस्कृताः । मन्त्री नागतः । मन्त्रिणं वन्दापयितुं गृहे गताः । मन्त्री द्विजावृतो गवाक्षस्थो दृष्टः । तेन नाभ्युत्थिताः; ते **व्याघुटिताः** । 55.4-6. *Vide* PC., PK.

वि+आ+√पृ to work as an administrator. एकदा व्यापारे व्यतीते नागडमन्त्रिणि **व्याप्रियमाणे** 77.27. *Vide* व्यापार.

विग्रता f. pre-occupation. ते अतीव ईदृशी **विग्रता** यत्कुलगुरवोऽपि आगता न ज्ञाताः । 55.6. [The word विग्रता is a dialectical pronunciation of व्यग्रता.]

विचारचतुर्मुख m. a title of king Kumārapāla of Gujarāta; lit.: 'the four-headed god *viz.* Brahman in wisdom'. 125.11. *Vide* PC.; also PK., where the word is given as a title of Minister Vastupāla.

विच्छिति f. a ceremonial bath with perfumes and perfumed oils, medicinal powders, perfumed waters, etc. स्नानपीठे स्वर्णमये महा**विच्छित्या** स्नातं कारितः । 17.22

विजययन्त्र m. a diagram of a mystical nature used as an amulet supposed to bestow victory. एकदावसरे सूरिणा **विजययन्त्र**प्रभावः प्रोक्तः । तदनु पञ्चाशद्द्रम्मैः स कारितः । सुरत्राणेन पृष्टम्—कः प्रभावः ? । सूरिणा कथितम्—यत्रायं यन्त्रो भवति तत्रारिः कोऽपि नायाति । ...तदनु सुरत्राणेन छागमानाय्य तस्य देहे **विजययन्त्रो** बद्धः । बहवः खड्गप्रहारा मुक्ताः परमेकोऽपि न लग्नः । Int. 31.6-9.

विज्ञप्तिका f. a report. तद्देशभङ्गं कुर्वाणः कल्याणकटकनाम्नीं राजधानीमाजगाम स क्रमेण । परं कोऽपि **विज्ञप्तिकां** कर्तुं न शक्नोति यत्कटकमागतम् । 90.16-17. *Vide* PC.

विटङ्क m. a peak (of a mountain). 51.29.

विड्वर m. a difficulty, an affliction. तस्याज्ञया जलज्वलनौ स्तम्भ्येते स्म । पतन्त्यो भित्तयो दत्तायां तदाज्ञायां न पेतुः । लूता द्विचत्वारिंशत्, अन्धगडाः सप्तविंशतिः, स्फोटिका अष्टोत्तरं शतं, **विड्वराणि** दोषाश्च सर्वे व्यनेशन् । 9. 31-33; दिगम्बर-विडम्बना उक्ता । गुरुभिश्चिन्तितम्—

आः कण्ठशोषपरिपोषफलप्रमाणो
व्याख्याश्रमो मयि बभूव गुरोर्जनस्य ।
एवंविधान्यपि विडम्बन**विड्वराणि**
यच्छासनस्य हहहा ! मसृणः सृणोमि ॥

27.33-28.1-2. [The *Abhidhānarājendra*, vol. VI, p. 1148[b], explains विड्वरम् as an inauspicious constellation: 'यस्मिन् नक्षत्रे ग्रहो वक्रतामुपयाति शुद्धं वा विधत्ते तादृशे नक्षत्रभेदे ।' Here शुद्धं is probably a printing mistake for युद्धं] *Vide* PK.

√विद् (causal) to experience. यदि भणसि ततस्तवारोग्यता दीयते । परमागामिभवेऽपि कर्म **वेदयिष्यसि** । 114.19-20. cf. Guj. वेदवुं 'to experience, to endure (the fruits of *karmans*)' (in Jaina parlance).

विदाहि f. farewell. यदि सुरत्राणो **विदाहिं** ददाति तदा पश्चाद्वलित्वा स्वस्थाने याति नान्यथा । Int. 31.16. cf. Guj. विदाय. *Vide* वदाहि.

विद्यपुञ्ज adj. a heap of learning, highly learned. 118.16. [Metrically shortened form of विद्यापुञ्ज.] *Vide* PC.

विद्यापुर n. N. of a town in North Gujarāta, modern Vijāpura. 67.19.

विद्यामठ m. a monastery where different *Śāstras* were taught. 105.4.

विधि f. goddess of destiny. षष्ठीदिने **विधिरेत्य** ललाटेऽक्षराणि क्षिपति । 109. 4, 11, 13, 16, 20, रावणनृपालयसप्तमभूमौ कुचेलां कोद्रवदलनपरां **विधिं** राक्षसनिवेदितां ननाम । 21; 110.2, इति **विधिर्यद्**दिधत्ते तद्भवति, मनुष्यकृतं न भवति । 4.

विध्यापित adj. extinguished, blown off. नृपेण भाण्डागारात् षोडशलक्षान् दत्त्वा ध्वजा कारिता, दीपका **विध्यापिताश्च** । 24.15-16.

विरङ्ग m. lack of delight. एकदा तीर्थयात्रायां श्रीशत्रुञ्जये सङ्घपतिना अवारितं सत्रागारा विहिताः । ततः सङ्घवात्सल्ये विधीयमाने घृतं त्रुटितम् । सङ्घपतिचित्ते विषादो जात इति यद्विरङ्गो भविष्यति । 75.23-24.

विराधना f. an injury, a harm. प्रसादं विधाय मम प्रायश्चित्तं दीयताम् । प्रभो ! मया पञ्चेन्द्रियजीवस्य **विराधना** कृता । साऽद्यर्थं दूयते । 105.19.

विलक्ष adj. abashed. राज्ञा अबोटिका अभिहिताः—यद्यमूभ्यो देवीभ्योऽरोचिष्यन्त तदा ग्रसिष्यन्त । परं न ग्रस्ताः । तस्मादमूभ्यो मांसं नेष्टं किन्तु भवतामेवेष्टम् । तस्मादहं जीववधं न करिष्ये । ते **विलक्षाः** स्थिताः । छागमूल्यसमेन धनेन नैवेद्यानि कारितानि । 41.32—42.1-2.

वि + √लग् to cling to. शिरो शाखायां **विलग्नमेव** स्थितम् । 85.5; श्रीमात्रा कृत्रिमकुर्कुटा वासिताः । कृत्रिमशुनश्चरणयो**र्विलग्नाः** । 85.8. *Vide* √लग्; also *vide* PK.

वि + √लोक् to require. अत्र राजा **विलोक्यते** । कथम् ? । योऽत्र राजा भवति स रात्रौ विपद्यते । 1.14; यशःपटहः करी **विलोक्यते** । किमर्थम् ? । देव ! तेन विना द्वादशवार्षिको विग्रहो न भज्यते । 23.22; कः कन्यां प्रयच्छति । सर्वं निष्पन्नम्, भवतां वाक्यमेव **विलोक्यते** । 32.30-31; रक्षको भवदीयसुतो **विलोक्यते** । 37.1; को **विलोक्यते** ? । 39.7; शक्तिरस्ति परं सान्निध्यकर्ता कोऽपि **विलोक्यते** । 48.15; तेन स्वजीवनार्थं विक्रेतुं कोहलकानि समानीतानि । विक्रेतुं लग्नः । 'ईछे' सम्बन्धेन नवकोहलकानि गतानि । चत्वारो **विलोक्यन्ते** । खेटके पतितः । स आत्मानं विक्रेतुं कामोऽपि न छुटति । 110.1-10. *Vide* अव + √लोक्; also *vide* PK.

विवेकनारायण adj. an epithet of king Naravarman of Mālava; lit.: "Nārāyaṇa (i. e. Lord Viṣṇu) in the matter of discrimination". एकवेलं राज्ञा कथितम्—मदन ! वीसलेन राज्ञा तव नेत्रे कथं कर्षिते ? । गाढाग्रहं पृष्टेन तेनोक्तम्—**विवेकनारायण** ! गूर्जरधराधिपतिरस्मत्स्वामी विवेकबृहस्पतिः । यथा रणभग्नस्य नृपाधमस्य मुखमस्माकीनानि पात्राणि द्वारभट्टादीनि न पश्यन्ति । अत एवं विहितम् । 79.21-23.

विवेकबृहस्पति adj. lit.: 'Bṛhaspati in the matter of discrimination':

[1] an adjective of Gūrjaratrā *i.e.* Gujarāta. देव ! मया सह वादः कार्यताम् । अहं सिद्धचक्रवर्तीति बिरुदं न सहे । **विवेकबृहस्पति**-गूर्जरत्रेति च नरसमुद्रं पत्तनं च—एतानहं न मन्ये । 28.18-20; गूर्जरत्राया **विवेकबृहस्पतित्वम्**, 29.31.

[2] an epithet of king Visaladeva of Gujarāta. 79.22. For quotation *vide* विवेकनारायण.

विशोपक m. a type of small coin. 132.7. [This is the *same as* विंशोपक which occurs both in PC. and PK. विशोपक also occurs at PC. 53.2.]

विश्वविश्वाक्रोश m. universal censure; lit.: 'censure by the *whole world*'. 13?.16. *Vide* PC.

विश्वस्तघ्न m. killer of one who has put confidence in him. 81.11.

विषर्ज adj. unemployed; lit. 'who has been relieved from his job'. कस्यापि राज्ञो राज्ञी वदति—नृप ! मम भ्रातुर्व्यापारं देहि । **विषर्जोयम्** (?) । राजाह—राज्ञि ! व्यापारस्तस्य दीयते, यो व्यापारं कर्तुं जानाति । 115.21-22.

विसा॰ m. short form of विसाह, a surname of Banias. 132.31. *Vide* वसाह; also *vide* PC. वसाह, साह.

विसाधन n. food-provision ? उरंगलपत्तने गतः । तत्र ऑढरनायकाट्टे उपविष्टः । तेनागतेन पृष्टम्—क यास्यसि ? । तेनोक्तम्—यत्रोदरपूर्त्तिर्भविष्यति । नायकेन स्थापितः । शुद्धवृत्त्या सञ्चरन् विश्वासपात्रं जातः । एकदा चतुष्पदे **विसाधन**हेतौ प्रहितः । इतो हट्टान् दीयमानान् दृष्ट्वा पृष्टम् ।.... स क्रमेण **विसाधनमा**दाय गतः । 44.14-18.

वि + √सूत्र् to relieve from employment. प्राकारासन्नं कान्हडदेवं **विसूत्रयित्वा**... 46.2.

विस्मय *n.* astonishment. 116.16. [A gender peculiarity.]

विस्रम्भणी adj. confiding in.

श्रीमत्कर्णपरम्परागतभवत्कल्याणकीर्त्तिश्रुतेः
प्रीतानां भवदीयदर्शनविधौ नास्माकमुत्कं मनः ।
श्रुत्वा प्रत्ययिनी सदा ऋजुतया स्वालोक**विस्रम्भणी**
दाक्षिण्यैकविधानकेवलमियं दृष्टिः समुत्कण्ठते ॥ 70.23-26.

विहङ्गिका f. a bamboo lath provided with slings at each end for carrying pitchers etc. on one's shoulders (which is known as कावड in some Indian languages). इति विचिन्त्य देवपत्तने श्रीसोमेश्वरयात्रायै चचाल । परं **विहङ्गिकां** स्कन्धे निधाय तत्र गत्वा सोमेश्वर आराधितः । स प्रत्यक्षीभूय आह—कष्टं कथं कृतं यत्स्कन्धे **विहङ्गिकां** विधायेहागतः ? तेनोक्तम्—सुतं देहि । 38.8-9. *Vide* PC.

विहरण n. offering alms to Jaina ascetics. तपोधनानां **विहरणे** घृतघट १ दिनं प्रति । 33.18-19; स्थाने स्थाने सत्रागार-प्रासाद-पौषधशालां प्रारेभाते । वर्षमध्ये वार ३ सङ्घार्चा । यति १५०० **विहरणम्** । 57.22; एकस्मिन्नवसरे सुराष्ट्रायां सङ्घे व्रजति सति अग्रेसरैरेकाकिभिर्व्रतिभिर्वाटिकासु मार्गस्योपद्रवे कृते तपोधनिकैरेत्य मन्त्रिगोऽग्रे रावा कृता । मन्त्रिणोत्तारके कृते अनुपमदेव्यग्रे कथापितम्—यदद्य एकाकिनां **विहरणं** न विधेयम् ।' अपरे सर्वेऽपि **विहृत्य** गताः । ...अनायाते अनुपमदेव्या नगोदरं बन्धोः समर्थ**विच(ह ?)रणं** तेषां कारितम् । स्वयमवेलं भोजनार्थमुपविष्टा । 63.15-19. [A Jaina technical term.] cf. Guj. वहोरवुं, वहोराववुं (in Jaina parlance). *Vide* विहरणउं, वि + √हृ [2].

विहरणउं n. *same as* विहरण. १५०० तपोधन दिनं प्रति **विहरणउं** । 65.28. *Vide* वि + √हृ [2].

विहार m. [1] a Jaina temple. राज**विहार** 30.14, राय**विहारे** 17-18, नृप**विहार**समं प्रासादं कारयामि । 21, राज**विहारे** 31; 44.26, 27; 45.3, 12; करम्बक**विहारः** 125.14; 126.7.

[2] the travelling on foot from place to place by Jaina monks. अन्यदा धवलक्कके **विहारे** गताः । 26.26, **विहारे**णाजग्मुः 32; 95.9. *Vide* वि + √हृ [1].

[A Jaina technical term.] *Vide* PC., PK.

वि + √हृ [1] to travel on foot from place to place. शाकम्भरीं प्रति **विजह्रुः** । 31.9; तत्र ढक्कानामपुरीं **विरहन्तः** समेताः 93.19-20; **विहरन्** पल्यपुरे 95.12; विहरन्तो नड्डूले गताः । 107.7. [A Jaina technical term.] *Vide* विहार [2]; also *vide* PK.

[2] to beg alms. स गुरुः पादतललेपबलेन तपोधनेषु **विहरितुं** गतेषु श्रीशत्रुञ्जयादिषु देवान्नत्वा स्थानमायाति । 91.12; तपोधनेषु **विहर्तुं** गतेषु 93.8, श्रीसूरयः साधुषु **विहर्तुं** गतेष्वाकाशयानेन पूर्वोक्तपञ्चतीर्थेषु यात्रां कृत्वा नित्यमायान्ति । 29; तत्र पाके निष्पन्ने तपोधनौ **विहर्तु**मायातौ । श्वश्रू गृहे नास्ति । अम्बया महाभक्त्या प्रतिलाभितौ । 97.31-32; संतोषतुष्ट आरब्धस्नाने धनपाले **विहर्तु**मागतसाधुभ्यां दधिसम्बन्धेन बुद्धे–119.24. [A Jaina technical term.] cf. Guj. वहोरवुं (in Jaina parlance). *Vide* विहरण, विहरणउं.

Vide PK.

वीरचर्या f. the moving of the king in disguise at night in the streets of the city in order to learn the views and condition of the people. 18.30; 36.27. *Vide* PC.

वुणिफल n. a cotton pod. एकदा पृष्टम्—दुनीमध्ये किं पुष्पं वृद्धम् ? । सभ्यैः स्वधियोक्तम्—परं तत्र मनश्चमत्कारकारि । सूरिणोक्तम्–**वुणिफलं** वृद्धम् । येन नवखण्डपृथ्व्या लज्जा ढङ्क्यते । तेन हेतुना जगढंकणीति बिरुदं दत्तम् । Int. 30.27-28. cf. Deśī वुणण 'to weave', वुणिय 'woven'; Guj. वणवुं, Hindī बुनना, Mar. विणणें—all in the sense of 'to weave'. *Vide* √वण्.

√वृत् (causal) to publish, to make current, to spread. कविः कर्त्ता एव, परं राजा ग्रन्थं **वर्त्तापयति** । 78.21.

वृत्तान्त *n.* tidings, the detailed account of an incident. आचार्यैस्तत्पार्श्वतो वृत्तान्तः पृष्टः । तेन समूलं **वृत्तान्तमुक्तम्** । 98.23-24. [A gender peculiarity.]

√वृध् (causal) to greet, to welcome, to perform certain congratulatory ceremonies in order to greet or welcome. तत्र धवलगृहमारब्धम् । काष्ठदले निष्पद्यमाने, भित्तयः पृथुला जाताः । पट्टास्तु ह्रस्वाः । सूत्रकारैरचिन्ति–किमुत्तरं करिष्यामः । वेश्या एका पृष्टा—वयं केनोपायेन निस्तरिष्यामः । तयोक्तम्—न भेतव्यम् । सा वर्द्धापनार्थं स्थालमादायाक्षतैर्भृत्वा राजकुलं गता । पृष्टा राज्ञा—किमिदमद्य ? । देव ! लाखणगृहं **वर्द्धितम्** । कथम् ? । पश्यत, भित्तयः पृथुलाः पट्टा न्यूनाः । स तदेव शकुनं मत्वा तां सत्कृत्य प्राहिणोत् । 102.

15-19; प्रतिग्रामं तन्निवासिनार्योऽक्षतनालिकेरकुसुममालाचन्दनादिभिः [सूरिराजं] सुरत्राणं च **वर्द्धापयन्ति**। Int. 31.17-18; ततः सुरत्राणेन मुद्गरघाते दत्तेऽग्निस्फुलिङ्गाः प्रकटीभूताः, परं न भग्नः। तेन प्रभावेण रञ्जितेन स्थालं टङ्कैर्भृत्वा नेमि**र्वर्द्धापितः**। Int. 32.1-2. *Vide* वर्द्धापन, वर्द्धापनक, वर्द्धापनिक; also *vide* PC., PK.

वृद्ध — adj. [1] elder. उभाभ्यां विमृष्टम्—वयं ज्ञाता अस्माकमेतत्परीक्षार्थं कृतम्। ततो **वृद्धेन** कर्णात् खटिकामादाय बम्भसूत्रं कृतम्। 105.7-8; निर्व्यञ्जनं मत्वा लघुना कटाहिः कृष्टा। इतो **वृद्धो** भ्राता आययौ। Int. 29.16-17.
[2] excellent, best; lit.: 'big'. एकदा पृष्टम्—दुनीमध्ये किं पुष्पं **वृद्धम्**?। सभ्यैः स्वधियोक्तम्—परं तन्न मनश्चमत्कारकारि। सूरिणोक्तम्—वुणिफलं **वृद्धम्**। येन नवखण्डपृथ्व्या लज्जा ढक्यते। Int. 30.27-28.
cf. Guj. वडुं and Hindi बड़ा in both these senses.

वृद्धसरस्वती — m. N. of an Ācārya in employment of king Bhojadeva of Dhārā. तत्र **वृद्धसरस्वती**ति नाम्नाऽऽचार्या नृपसेवकाः सन्ति। 20.24-25.

वेडित — adj. ? १४२९ श्रीजिराप० श्रीसाल्लदेवसू० स्वं चरित्रं न **वेडितं** पश्चात् ढिल्यां ग० स्वमुपार्ज्य पश्चात् संवत् १४३० भाद्र० मासे श्रीगिरनारे समभाव० त्वा परलो० जगाम। 136.6-7.

वेणीकृपाण — m. a title of the poet Amaracandra, who compared in a *śloka* the *veṇī* or braid of a young woman with *kṛpāṇa* or sword of the god of love. 78.24. *Vide* PK.

वेला√लग् — to be delayed. श्वेताम्बरश्रीदेवाचार्यपौषधागारे समर्थनमजनि। तत्र **वेला लग्ना**। 27.12. *Vide* √लग् [7], घारा; also *vide* PK.

वेष्टित — adj. beseiged. अत्रान्तरे मालवेशयशोवर्म्मणा श्रीपत्तनं **वेष्टितम्**। ......गाढं गढरोधं भणित्वा मन्त्रिणा दण्डो मानितः। 35.25-26. *Vide* PK. वेष्ट.

वैकटिक — m. a jeweller. तस्य पाषाणस्य दलानि **वैकटिकात्** कारितानि। क्रमेण धनी जातः। 33.17-18, पाषाणोऽपि **वैकटिकाय** दर्शितः। अर्द्धमुक्त्वा विदारितः। लक्ष्यमूल्या मणयः कृताः। अर्द्धमर्द्धं कृत्वा गृहीताः। 33. cf. Pkt. वेअडिअ.

वैकालिक — n. a supper. एकदा प्रतापमल्लो रात्रौ **वैकालिकं** कर्तुमुपविष्टः। सा वेश्या प्ररिवेषयति। नामुलदेवी दीपकरा पराखी (?) वर्त्तते। 39.1-2; इतः कौटुम्बिकः कान्तया **वैकालिकायो**पवेशितः। तेनोक्तम्—वीरमः क?। तया प्रोक्तम्—कापि रन्तुं गतः। तेनोक्तम्—आकारयत, तं विना नाहं भोक्ष्ये। 54.16-17. cf. Guj. वियाळु, वाळु; Hindi ब्यालू; Mar. ब्याळू.

वैज्ञानिक — m. an artisan, इतः प्रातर्दन्तधावनं कृत्वा नगरान्तः प्रविशति। तावत्खड्गकर**वैज्ञानिकं** ददर्श। तेन खड्गो दत्तो वन्दितः। चिन्तितं मम कार्यं जातमेव। शकुनं भव्यम्। तेन किमपि न याचितम्। अग्रे मोचिकेनोपानहौ दत्ते। 39.11-13.

व्यञ्जन — n. a blemish; lit.: 'a taint'. वालाकदेशमध्ये सुग्रामग्रामे दत्तः श्रेष्ठी। तस्य द्वौ सुतौ। एकदा श्रेष्ठी अनशनं जगृहे। **निर्व्यञ्जनं** मत्वा लघुना कटाहिः कृष्टा। इतो

वृद्धो भ्राता आययौ। तेन दृष्टा...गार्थे कलहं कृत्वा मृतौ। Int. 29.16-17.
[निर्व्यञ्जन = devoid of blemish; lit.: 'taintless'.]

व्यतिकर — m. a matter. भोः! त्वं वसाहपुत्रः (*v.l.* वसाहमुख्यः) सङ्घमुख्यस्तव शत्रुञ्जये किं लग्नम्?। द्रम्म चत्वारिंशत्सहस्राणि (४००००), रैवतके त्रिंशत्सहस्राणि (३००००)। देवपत्तने किं?। तेनोक्तम्—तत्रास्माकं तीर्थेऽधिकतरम्?। मन्त्रिणा **व्यतिकरः** श्रुतः। यद्गुरुणा ब्राह्मणेनोक्तम्—प्रियमेलके स्नानं तदा स्यात्, यदा पूर्वतीर्थव्ययप्रायश्चित्ते लक्षं द्विजेभ्यो दुग्धेन प्रक्षाल्य ददासि। तेन स्वीकृतम्। 61.18-21.

व्यन्तर — m. a type of super-natural being of a low order. 51.31; इति तेन **व्यन्तरेणात्र** भरते वस्तुपालानुपमदेव्योर्गतिः प्रकटीकृता। 69.5; 73.32; 74.1-2, 2, **व्यन्तरेणो**क्तम्—अनेन......ना मया वारितेनापि मम बलीवर्द्दयुगं प्रभुतयैव गृहीतम्। तद्विरहेणाहं मृतः। ततो मयास्य पुत्रयुगं मारितम्। 3-4; यवन**व्यन्तरः** 83.19, 21, 23, 26, 27; 84.27; 95.24; 98.21; 99.29; 100.2, 4, 5, 10, 14, 26, तेन **व्यन्तरेणा**त्मशरीरमधिष्ठाय राज्ञोऽग्रे भणितम्—यन्महाराज! क्षाम्यन्तां आचार्याः। अन्यथा तव नगरोपरि शिलां पातयिष्यामि। 29-30; 101.18; 103.15; 105.22; सर्वे **व्यन्तरास्तुरुष्कव्यन्तैरु**पद्रुताः। 107.11; 109.28; 114.14; 115.17; 134.16.
व्यन्तरी f. 91.28.
cf. Guj. वंतरो, वंतरी. *Vide* झोटिङ्गचेट, धूंसक, मोग; also *vide* PK.

√व्यय् — to sell off. राज्ञः स्थालं गृहीत्वा चौरैस्तस्य श्रेष्ठिनो हट्टे **व्ययितम्**। ततो राज्ञा आकारितो व्यवहारी। 46.16-17.

व्यवहारगृहश्रेणि — f. a row of merchants' mansions. अथैकदा सिद्धनृपतिर्नगरचरितं ज्ञातुं छन्नं भ्रमति स्म। **व्यवहारगृहश्रेणौ** एकस्मिन्नावासे बहून् दीपानालोक्य प्रातस्तस्याकारणं प्रहितम्। 24.13-14. *Vide* व्यवहारिन्.

व्यवहारिन् — m. a merchant. 2.23, 25; 3.34; 4.5; 32.25; 45.1-2; 46.14, 17; 54.2; 56.30, 34; 64.33; 80.13; 111.21, 26; 112.3, 23, 30; 113.6, 22; 114.25; 115.19, 25; 125.14-15; 131.24; 132.14; Int. 31.30; Int. 32.2-3. *Vide* व्यवहारगृहश्रेणि; also *vide* PC., PK.

व्याघृत — adj. (food) relished with a heated mixture of mustard, asafoetida, chillies, etc. in oil or ghee. एवं रसवतीं कृत्वा...... लोकयितुं (?) व्रजन् वैद्यः शीतकालं भणित्वा अश्वानां तिलकुट्टीं दत्त्वा **व्याघृतः** सिरःस्थिता शेषतिलकुट्टयोऽपि श्यत् (?) तस्याः परिमलमाघ्राय तिलकुट्टीं....चिन्तितं ममैष सनोस्थो दुष्टः। 89.9-11. cf. Guj. वघारेलुं.

व्यापार — m. a higher government service. सज्जनः सुराष्ट्रायां **व्यापारे** प्रहितः। 34.3; नृपेण तुष्टेन पुन**र्व्यापारो** दत्तः। 34.15; 34.24, 28; 52.32; 53.22; 54.35; 67.23; 68.27; 73.20; 77.27; 110.16; 113.3, 4; 115.21, 21-22, 22, हस्तिपदे रक्षा**व्यापारो** दत्तः। 115.23-24, 27. *Vide* वि + आ + √पृ, व्यापारिन्,

व्यापारिन् — a government officer. 34.7; 35.28; 40.7; 55.24; 73.31, 33; 80.20; 115.1, 23. *Vide* वि + आ + √ पृ, व्यापार.

व्यास m. a Brāhmaṇa who expounds the Purāṇas in public. एवं राजश्रीवीसलदेवस्य सदसि महं० सातूकस्य **व्यासस्य** च होडा जाता। 80.5, मन्त्रिणि श्री[वस्तुपाले] दिवंगते पं० सोमेश्वरदेवेन **व्यास**विद्या समर्थिता (०र्थना ?) त्यक्ता। 9, वस्तुपालस्याग्रे **व्यास**विद्यां विधाय नान्यस्य पुरो विदधामि। 10-11; तत्र जायमाने जागरणे **व्यासेनै**केन वाहगस्याग्रे लोलीयाणकं व्याख्यातम्। 114.21-22.

शक m. a Muslim. एकदा गर्जनकात् तुरुष्काधिपतिः पृथ्वीराजेन सह वैरं वहन् योगिनीपुरोपरि चचाल। ......तुरुष्कसैन्येन सह युद्धं जातम्। भग्नं **शाक**सैन्यम्। सुरत्राणो जीवन् गृहीतः। 86.5-8; मन्त्रिणि विसूत्रितेऽपि न त्यजति। स सुरत्राणाय मिलितः। तेन कटकं **शकानामहूतम्**। आयातं श्रुत्वा पृथ्वीराजः सम्मुखो निःसृतः। 87.2-3. *Vide* तुर(रु)ष्क.

शकटिका f. a portable iron grate. **शकटिका**माधाय उदरसेकः कृतः 4.29. cf. Guj. शगडी, सगडी. *Vide* अग्निशकटी.

शकुन्तिका f. a kite. लाखणो घातजर्जरः कृतः पतितः। इतस्ते यावदुच्छ्वसितुं जनाः प्रवृत्तास्तावदसगिदेव्या गोत्रजया **शकुन्तिकारूपं** कृत्वोपरि त्रिपत्य रक्षितः। 102.4-5.

शब n. a corpse. 82.9; 128.25. cf. Guj. शब.

शब्दः √पत् — (causal) to give public notice. तया नगरमध्ये **शब्दः पातितः**। यः कोऽपि मरुस्थल्याः समायातः सोऽभ्येतु। 84.16; cf. Guj. साद पडाव्यो.

शय m. a hand. श्रीजयसिंहदेवस्यान्यदा महं गांगाकेन आम्राणि प्रहितानि कस्यापि विप्रस्य **शये**। ततः स श्रीजयसिंहदेवसदो दृष्ट्वा क्षुभितः। तत आह—राजन्! महं आंबिल गांगे मोकल्यां छइं। सता उपरी पसावउ। ततो हसितरसः॥ 36.30-32. *Vide* हस्ते.

शरीरचिन्तायां √या — to go to ease one's bowels. स यदा **शरीरचिन्तायां याति** तदा निधानमेव विलोकयति। 32.21. *Vide* तङ्गणिकायां √गम्.

शल्यहस्त m. a royal officer; lit.: 'the wielder of a lance'. कुमुदचन्द्रेण लब्धां दत्त्वा बारही परावर्तिता। भाण्डागारिककपर्दिनं विना **शल्यहस्तं** बाहुकनामानं मन्त्रीश्वरं बाहुडदेवं च विना। 28.32-33; तस्य **शल्यहस्तः** श्रीमालज्ञातीयः प्रतापसिंहः, मन्त्री कइंबासः। तयोरुभयोः परस्परं विरोधः। ......प्रतापसिंहः करमुद्राहयितुं याति गर्जनके। एकदा मशीर्ति विलोकितुं गतस्तत्र स्वर्णटङ्ककलक्षं दुर्वेसादीनां ददौ। मन्त्रिणा नृपायाभिदधे—देव! गर्जनकद्रव्येण निर्वाहः स्यात्। स तु इत्थं विद्रवति। ......इतः **शल्यहस्तो** नृपस्य कर्णे विलग्नः—यदेष मन्त्री वारं २ तुरुष्कानानयति। 86.2-13. *Vide* PC. सेलभृत्.

शष्कुली f. a (dry) sweet. तथा 'शुष्कां **शष्कुलीं** भक्षयतो भगवतो बौद्धस्य पञ्चज्ञानानि समुत्पन्नानि' इत्यादि श्रुत्वा बौद्धाचार्यं जगौ—यदहं जैनः, परं त्वद्दर्शनमादरिष्यामि। 106.22-23. cf. Pkt. सक्कुली. [The following quotation will be found interesting in this connection:

उवस्सगस्स अंतो वगडाए ......पूवे वा **सक्कुली** वा सिहरि वा उक्खित्ताणि वा विक्खित्ताणि वा ...... नो कप्पइ निग्गंथाणं वा निग्गंथीण वा अहालंदमविवत्थए.

—Bṛhatkalpasūtra, II. 8 (Vol. IV, p. 969.).

Ācārya Kṣemakīrti (1276 A.D.) comments on the words denoting eatables thus:

'पूपः आर्द्रखाद्यविशेषः, तद्ग्रहणेन लपनश्रीप्रभृतिकं सर्वमप्यार्द्रखाद्यकं गृहीतम्। .. **शष्कुलिकाग्रहणेन** शष्कुलिका-मोदकादिकं सर्वमपि शुष्कखाद्यकं सूचितम्। *Ibid.*, p. 970. The word is prevalent in Old Guj. in the form साकुली. *Vide e.g.*: दुधवर्ण्ण दहीथरां, घृतवर्ण्ण घारी, सुकुमाल **साकुली**, सेव **साकुली**, परीसणहारि नूही आकुली, ...*Varṇaka-samuccaya*, part I, p. 5, lines 14-15.] cf. also Modern Guj. सांकळी.

शस्त्रम् √कृ — to fight. स क्षुधितः सन् नृपं प्राह—त्वं स्ववाक्याच्च्युतः। अतः **शस्त्रं कुरु**। **शस्त्रे कृते** नृपेण भूमौ पातयित्वा कण्ठे चरणः प्रदत्तः। 1.23-24.

शस्त्रिका f. a dagger. 90.8. *Vide* PK.

शाटक m., n. a type of loose cloth worn around the neck and thrown over the shoulders loosely hanging on both sides.

'पुत्रादपि प्रियतमैकवराटिकाणां
मित्रादपि प्रथमयाचितभाटकानाम्।
आजानुलम्बितमलीमस**शाटकानां**
वज्रं दिवः पततु मूर्ध्नि किराटकानाम्॥

123. 15-16. *Vide* शाटकमलनिर्धाटक; also *vide* PK. शाटिका.

शाटकमलनिर्धाटक m. a washerman. 121.30. *Vide* शाटक, शाटी; also *vide* PC., and PK. शाटिका.

शाटी f. a sārī, a kind of cloth worn by ladies. 41.20. *Vide* शाटक, शाटकमलनिर्धाटक, शृङ्गारकोटिशाटी, साडी; also *vide* PK. शाटिका-शाटी.

शाला f. premises. खरतराणामाचार्याणां निशि कोऽपि रङ्को दुर्भिक्षे परिभ्रमन् **शालाद्वारि** समागतः पूत्करोति। 115.13; श्रीजिनप्रभसूरयः पत्तननगरं गच्छन्तः तपापक्षश्रीसोमप्रभसूरि**शालायामी**युः। Int. 31. 22-23, ततः सर्वे मूषकाः **शाला**[तो बहिः] निःसृत्य सूरेरग्रे उपविष्टाः। 26-27, ततस्तस्य मूषकस्य देशपट्टो दत्तः, **शालान्तर्न** स्थेयम्। 29. *Vide* PK.

शालापति m. a weaver. 8.19, 21; 32.11, 14-15, 18; 88.3, 10-11. *Vide* PC., PK.

शालिभक्त n. a meal in the form of boiled rice. गुरुभिरपि ततोऽभिग्रहो गृहीतः—वयमाचाम्लान् तदा मोक्ष्यामः, यदा भवदभिग्रहः सेत्स्यति। भोजनवेलायां देव्या मन्त्रिणो भाजने **शालिभक्तं** प्रासुकजलं च मुक्तम्। मन्त्रिणा कारणं पृष्टम्। तयोक्तम्—भवतामभिग्रहोऽस्ति—यत् गुरुदत्तशेषं भोक्तव्यम्। 75.19-21. *Vide* PK. भक्त, भक्तपान.

शासन n. [1] a document of donation. तेनावर्जितेन ग्रासशासनादि समर्पितम् । 79.21.
[2] the religious authority of Jainism. शासनस्य प्रभावकः 96.9.
Vide PK.

शासनदेवी f. the presiding deity of the Jaina religion. 26.27; 95.14, 17, 21; 107.10-11. *Vide* PC. शासनदेवता; PK. शासनदेवता—शासनदेवी.

शिप्रा f. [1] a conch-shell. पापक्षयो हारः, संयोगसिद्धिः शिप्रा 40.3; संयोगसिद्धिशिप्राकरा 41.21-22. *Vide* सिप्रा.
[2] hotchpotch, a mixture of rice and pulse cooked together. तया शाकं कृत्वा शिप्रां भृत्वा चेद्युक्ता—भोजनावसरोऽस्ति देवस्य परिवेषय। 41.6, गवाक्षस्याधः समुद्रस्तत्र शिप्रां ढालयामास । 8.

शिबिका f. a bier. अन्यदा कपटमृत्युना प्रभूणां तद्गृहद्वारे शिबिकागमने पाश्चालेन शोकाद् उक्तम्—94.18.

शीतरक्षा f. a quilt. 17.13. *Vide* PC.

शुकटी f. lying down covering the whole body including the face. अथाहममुं निर्माय कृतकृत्यो जातः । शयनं विधास्ये इति शुकटीं (मुखे पटीं ?) कृत्वा सुप्तः । 48.1-2. cf. Guj. expressions: सोड करीने सूवुं, सोड ताणीने सूवुं.

शुक्रवार m. Friday. 135.13.

शुण्ड m. a wine-vessel. धनिकेन कनकं दृष्टम् । धनिकेन शुण्डो भृत्वा स्वर्णस्यार्पितः । 26.16. cf. Skt. शुण्डा (Pkt. सोंडा) 'wine', शौण्डिक (Pkt. सोंडिय) 'a distiller', शुण्डिका (Pkt. सोंडिया) 'a wine-vessel'.

शुद्धताला adj. pure; lit.: 'with clean palms'. इत्युक्त्वा नावमधिरुरोह । सपुत्रापि ब्रुडिता । लोकः कोलाहलं यावत्करोति तावन्नावमधिरूढा देवी सशृङ्गारा शृङ्गारकोटिशाटीपरिधाना,......संयोगसिद्धिशिप्राकरा सर्वैरपि दृष्टा शुद्धताला पपात । नृपेण नगरमध्ये प्रवेशिता । 41.19-22.

शुद्धि f. [1] information. नृपस्त्ववन्त्यां गतः । नृपस्तु द्वारे स्थित्वा कञ्चिन्नरं नगरस्य शुद्धिं पप्रच्छ । तेनोक्तम्—नृपस्य पट्टहस्ती अद्य विपन्नः । 6.15-16; निव हमविमृश्येतो माघेन माघकाव्यपुस्तकमर्पयित्वा प्रिया माल्हणादेवी नाम्नी धारायां नृपसमीपे प्रहिता—यदमुं ग्रन्थं ग्रहणकेऽङ्गीकृत्य लक्षत्रयं द्रम्माणां ददत । सा तत्र गता नृपेण शुद्धिः पृष्टा । पुस्तकमर्पितम् । लक्षत्रयी याचिता । 17.33-35; नृपेणोक्तम्—रे द्रम्माः क ? देव ! सन्ति । कथं नानीताः । स्वामिन् ! रैवतकं दुर्गं मत्वा तत्र भाण्डागारे स्थापिताः । नृपेणोक्तम्—तत्रागम्यते तदा दर्शयसि ? । देव ! दर्शयामि । नृपस्तु तत्र गतः । पृष्टः—कास्ते ? । उपर्यागच्छत । तथा कृतम् । प्रासादे नेमिं नत्वा बहिरायातः । पृष्टम्—केनात्र प्रासादः कारितः ? । सज्जनेनोक्तम्—श्रीसिद्धेशेन । मम तु शुद्धि[रपि न] कथं जातः ? । देव ! इदमुद्ग्राहितम् । राज्ञोक्तं न मन्यते । ममादेशं विना

कथं कारितः । 34.9-13; सा अन्यासक्ता दृष्टा । तया चिन्तितम्—अहमनेन ज्ञाता । स पुनरपि भर्त्तारं प्रति चलनाय लग्नः । तस्य चलतो द्वौ मोदकौ समर्पितौ सम्बलार्थम् । एको विषमिश्रितो द्वितीयो न । यथैष विषमिश्रितमोदकभक्षणेन विनश्य भर्तुरग्रे गृहस्वरूपं न कथयति । स चलितः । तस्यैव ग्रामगोन्द्रके निर्विण्णो भर्त्ता तस्या उपविष्टो दृष्टः । क्षुधाऽऽक्रान्तः । तत्र द्वौ जनावुपविष्टौ । ....विषमिश्रितमोदकभक्षणेन लहरितः । मूर्च्छां प्राप्तः । तावता दण्डपाशिकैर्धृतः ससखा । लोको मिलितः । तस्योपद्रोतुं लग्नः । मारणार्थं नीतो जनः । भार्यायाः शुद्धिर्जाता । मोदकभक्षणेन दूरदेशादायातो मम भर्त्ता विनष्टः । स जनो मारणार्थं नीतोऽस्ति । 111.7-13. *Vide* सुद्धि.
[2] finding out, search. अन्यदा मार्गे सञ्जातचौरोपद्रवेन स्वशालकगृहं गतः । तस्य माता शुद्ध्यर्थमायाता । Int. 12.31-32; एकदा कापि कटके गतस्तत्र सर्वपरिकरो मारितः । मात्रा शुद्धिमलभमानया पण्डितः पृष्टः । भागिनेयस्य सारा न प्राप्यते । पं० उक्तम्—एकाकी वस्त्रं विना मध्यरात्रौ समेत्य गुफायां स्थास्यति, तत्र चीवराण्यादाय जनः प्रेष्यः । Int. 15.17-19.

शुषिरत्र्यम्बकस्तम्भ m. a hollow pillar having three holes, used as a heating appliance in winter. भोजान्ते भोजनम् । शीततौ प्रावरणम् । प्रच्छादककदशनं भोजितः लादितश्च रात्रौ स्तोकान्नं स्निग्धम् । प्रतलमाच्छादनम् । शुषिरत्र्यम्बकस्तम्भान्तःप्रविष्टाग्नितापेन न शीतार्तो राजा । 130.28-29.

शुष्कभक्षिका f. a kind of sweet-meat; lit.: 'a dry (sweet) eatable'. कदाचिन्मड्डाहडेऽशिवमुत्पन्नम् । लोको दिशोदिशं गतः । वीरणागोऽपि भृगुकच्छे गतः । पूर्णचन्द्रस्तु अष्टवार्षिकः सन् शुष्कभक्षिकां विक्रीणाति । गुरवस्तत्रायाताः । स शुष्कभक्षिकां विक्रेतुं कस्यापि गृहे गतः । 26.13-14. cf. Guj. सुखडी.

शृङ्गारकोटिशाटी f. a very precious sārī. 41.20. *Vide* शाटी, शृङ्गारकोडि(डी) साडी.

शृङ्गारकोडि(डी) साडी f. a very precious sārī. 40.2; 46.28. *Vide* शृङ्गारकोटिशाटी, साडी; also *vide* PC.

शृङ्गिणी f. a bow. स्थाने गतः केन गृहीतुं शक्यः ? । तेनोक्तम्—छन्देन । वाद्यान् वादयतः, यथा तुरगो नृत्यति । तथा कृते तुरगो नर्त्तितुं प्रवृत्तो न चलति । नृपस्य कण्ठे शृङ्गिण्यः पेतुः । राजा गृहीतः सुरत्राणे[न],...... इतो नृपोत्तारकसम्मुखं सुरत्राणः सभायामुपविशति । नृपः खिद्यते । स प्रधानः समभ्येति—देव ! किं क्रियते, दैवादिदं जातम् । नृपेणोक्तम्—यदि मे शृङ्गिणीं बाणांश्चार्पयसि, तदाऽमुं मारयामि । तेनोक्तम्—तथा करिष्ये । पुनर्गत्वा सुरत्राणाय निवेदितम्—यदत्र त्वया नोपविशनीयम् । सुरत्राणेन तत्रायःपुत्तलकः स्वस्थाने निवेशितः । राज्ञः शृङ्गिणी समर्पिता । राज्ञा बाणं मुक्तम् । अयःपुत्तलको द्विधा कृतः । नृपेण शृङ्गिणी त्यक्ता । न मे कार्यं सरितमन्यः कोऽपि मारितः । 87.12-19; महति संयुगे जायमाने नृपेणोक्तम्—रे गलितकंसस्य ६४ जोटकानि निःश्वानानां किं स्फुटितानि ? । [कथं] न श्रूयन्ते । देव ! वाद्यमानानि सन्ति परं शृङ्गिणीगुणैरुप्रलप्सा(? रुद्धा)नि । 90.6-8. *Vide* सिङ्गिणि.

शोफ m. a swelling. आयुर्वर्षाणां चतुरशीतिः, परं प्रान्ते चरणशोफेन मृत्युः । 17.2-3. *Vide* PC.

श्यत् adj. attenuating, making thin. एवं रसवतीं कृत्वा......लोकयितुं (?) व्रजन् वैद्यः शीतकालं मुणित्वा अश्वानां तिलकुट्टीं दत्त्वा व्याघ्रुतः सिरःस्थिता शेषतिलकुट्टयोऽपि **श्यत् (?)** तस्याः परिमलमाघ्राय तिलकुट्टीं......चिन्तितं ममैष मनोरथो दुष्टः। 89.9-11.

श्राद्ध m. a lay follower of Jainism. 31.1b; 106.2; 115.5; Int. 32.4, 7. *Vide* PK.

श्रावणा f. a proclamation. नृपः स्वयमेत्य तां प्राह—तव ममाधुना दर्शनम्, पुत्रस्य तु का कथा? । उत्थीयताम् । देव! सर्वथापि वार्त्ता दिव्यं विना न वाच्या । प्रधानैर्दिव्यं दत्तम् । राज्ञी सुत........बहिर्ययौ । पौरसहितो नृपश्च । तत्र लोहमयी नौस्तस्यां समधिरोप्य, दिव्यकर्त्ता क्षिप्यते । शुद्धे तरत्यशुद्धे ब्रुडति । सा राज्ञीति कामा **श्रावणामकरि**.........त्यवद्रांव इत्युक्त्वा नावमधिरोह । 41.16-19.

श्रीकरण [1] n. Chief-minister-ship. 32.6; 50.1; वीसलं सुप्तमुत्थाप्य प्राह—यदि त्वं राजा तदा मे किं? । **श्रीकरणम्** । तर्हि चल । 67.7-8, 23, 29; 68.8; 88.8, अश्ववारैर्व्याहृतम्—भो विद्याधर! राजा आकारयति । तस्य मातुलपत्न्योक्तम्—रे, क स, क राजकुलं; कथं **श्रीकरणं** लप्स्यसे? । तेनोक्तम्—यद्भविष्यति तद्द्रष्टव्यम् । स राजकुले गतः । सर्वमुद्राधिकारी कृतश्च । 14-15.

[2] m. the Chief-minister. अर्बुदचैत्ये गजशालां वीक्ष्य यशोवीरेण मन्त्रिणा पृष्टम्—भवतां पूर्वजः कः **श्रीकरणः**? । पृष्टम्—कथम्? । श्रीकरणं विना गजशाला सत्या न भवति । 67.28-29. *Vide* सर्वमुद्राधिकारिन्, सर्वमुद्राधिकृत; also *vide* PC., PK. श्रीकरणमुद्रा.

श्रीकरी f. a vehicle characterised by a canopy (different from *sukhāsana* and *vāhinī* as it is mentioned along with them). 59.29. *Vide* PK.

श्वभ्र n. hell. 48.28.

श्वयथु m. a swelling. 18.11; 130.27. *Vide* PC.

ष(ख)ड n. grass. नृपद्वारे **ष(ख)ड**पानीयं चिक्षेप । देव! मया सह वादः कार्यताम् । 28.18-19. cf. Deśī, Guj. खड.

ष(ख)डपानीयम् √क्षिप् to throw grass and water (in the residence of an opponent). नृपद्वारे **ष(ख)डपानीयं चिक्षेप** । देव! मया सह वादः कार्यताम् । 28.18-19. *Vide* PC. तृणोदकप्रक्षेप, सतृणमुदकं प्र + √क्षिप्.

षड्भाषाचक्रवर्तिन् m. an epithet of Śrīpāla, the blind poet laureate of king Siddharāja of Gujarāta; lit. 'sovereign of six (Prakrit) languages'. 43.1.

षण m. an apartment. भव्यैष्टिकासद्मयेन भव्यकाष्ठैः कृत्वा **सप्तषणः** (खण्डः) प्रासादो नृपप्रासादसदृक्कारितः 2.9. cf. Guj. खण्ड; Mar. खण. *Vide* क्षण [1], सप्तषण.

षाणउठे ind. for meals? तया वेश्योक्तं—मम भ्रातुर्दालिमुष्टेरादेशो दीयताम् । तथाकृते स **षाणउठे (?)** नित्यं दालिमुष्टिं गृह्णाति । 38.33-34; रे! तव भ्राता काप्यस्ति । तया वेश्या दृष्टा । उक्तम्—**षाणउठे** प्रतिदिनं दालिमुष्टिं गृह्णाति । तत्र पृष्टस्तैरुक्तम्—यद्द्य नायातः । 39.2-3. cf. Pkt. खाण and Guj. खाणुं 'meals'.

षोडशवाह(हाय)न adj. who has already passed sixteen (years). प्रातर्नृपेण सुभटाग्रे उक्तम्—यदि द्वात्रिंशल्लक्षणं नरमानयसि तदार्द्धराज्यं ददामि । तेन गृहे गत्वा स्वपत्नी पुत्राय याचिता । **षोडशवाह(हाय)नः** सुतो दत्तः । 11.10-11. [It does not appear necessary to emend °वाहन to °हायन, as done by the editor, since वाहन, as a causal form of √वह्, yields the same sense.]

सकणशकणाम्बाभार m. a load or a bundle of the stalks of juwar or millet along with the ears containing grains. अन्यदा श्रीकुमारपालस्य कस्यापि कौटुम्बिकस्य गृहे हालिकत्वेन वर्त्तमानस्य **सकणशकणाम्बा**भारमुद्वहतः शिरस उपरि दुर्गयोपविश्य स्वरोऽकारि । ततः शाकुनिकः पृष्टः । तेनोक्तम्—तव राज्यं भविष्यति । परं तव सन्ततिर्न भविता । यतो युगन्धरीधान्यं सर्वधान्योत्कृष्टम्, तेन राज्यम् । यतः प्रभोर्हेतोर्भारकः, तेन न सन्ततिस्तव । 45.18-21.

सकाले ind. in time, before it is late. तेन कर्णवारीपुत्रेण कथितम्—भोः वणिक्पुत्र! रत्नानि **सकाले**ऽपि समर्पय, मा राजग्राह्यो(ह्यो)भव । 112.6-7. *Vide* PK.

सक्तुतीमन m. light dinner of barley-meal. त्वं पूर्वं काष्ठवाहको नित्यं **सक्तुतीमनम्**। 130.5-6. For तीमन cf. Pkt. तीमण; Guj. टीमण.

सगीन adj. related. कदाचिदुज्जयिन्यां चर्मकारहट्टे सिद्धेशो विनष्टः श्रुतः । ततः कृष्णमुखो जातः । तेनोक्तम्—किं कृष्णास्या यूयम्? भवतो नृपः किं **सगीनः**? । उत्तरः कृतः—नृपमृतौ को न दूयते । 38.28-29, cf. Pkt. सग; Guj. सगो; Hindī, Mar. सगा.

सङ्ख्य n. a battle.

लक्ष्मीं नन्दयता रतिं कलयता विश्वं वशीकुर्वता
त्र्यक्षं तोषयता मुनीन्मुदयता चित्ते सतां जाग्रता ।
सङ्खेऽसङ्ख्यशरावलीं विकिरता रूपश्रियं पुष्णता
नैकट्यं मकरध्वजस्य विहितो येनेह दर्पव्ययः ॥ 71.30-33.

[This is Pkt. derivative of Skt. सङ्ख्य.]

सङ्ग्रहणी f. a concubine. 89.16. *Vide* सङ्ग्रहिणी; also *vide* PC.

सङ्ग्रहिणी f. *same as* सङ्ग्रहणी. 132.14. *Vide* PC. सङ्गृहिणी.

सङ्घपति m. the leader of a pilgrim-caravan. 42.32; 75.23; 98.19; सङ्घेशः 99.2; सङ्घपतीभूय Int. 31.31. *Vide* PK., and PC. सङ्घाधिपत्य.

सङ्घवात्सल्य n. distribution of gifts among fellow pilgrims. 43.13, 32; 75.23. [A Jaina technical term.] *Vide* साधर्मिकवात्सल्य.

सङ्घात m. a company, a companion (especially in a journey). मत्स**ङ्घातो** याति । सत्वरं याहि । 2.31. cf. Guj. संघात, संगाथ; Mar. संगात.

सज्ज adj. healthy. तत्रादागतैर्भिषग्भिस्तं **सज्जं** वीक्ष्य प्रोक्तं—त्वया कथं घण्टारवोऽङ्कारि । 22.30-31 ; यदि जल्पिष्यते स तदा त्वमपि **सज्जा** भविष्यसि । दिनत्रयान्ते अम्बडः **सज्जो** जातः । साऽपि च । 40.23-24 ; सज्जनदण्डेशेन स्वयमुत्थापनिका कृता । शरीरे घातदशकं लग्नम् । परं म्लेच्छसैन्यं निर्द्धाटितम् । ......मन्त्री **सज्जाङ्गो** जातः ॥ 49.16-21 ; कुमारः पुरमाययौ । परं 'विसेमिरा' एतदेव वक्ति । मान्त्रिकैर्जल्प्यमानोऽपि तदेव वक्ति । ....स्वरूपं श्रुत्वोक्तम्—मां तत्र नयसि तदा **सज्जं** करोमि । 81.18-20 ; ताम्बूलप्रहारेण कुष्ठिनी **सज्जा** च० इत्यादि । 128.35. *Vide* सज्जी-√कृ; also *vide* PC., PK.

सज्जी-√कृ to cure, to make healthy. मम गृहे युवत्येकाऽऽयातास्ति सा **सज्जीकरिष्यति** । 81.21 ; सा राजपुत्री विद्याधरमारिता वैद्येन **सज्जीकृता** । 114.6. *Vide* सज्ज ; also *vide* PC.

सञ्चारकभू f. the passage (in a mansion). मरकतबद्धा भूमिर्दिव्या । काचबद्धा **सञ्चारकभूः** । 130.26-27. *Vide* PC.

सण्ड m. a bull. 85.3 ; Int. 29.18. cf. Pkt. संड; Guj. सांढ; Hindī साँड़; Mar. सांड.

सण्ढि f. a dromedary, a she-camel. बन्दीकृतस्य तस्यान्यदा भोजनं स्वानेनात्तम् । तदवलोक्य विषण्णः । आः किमेतत् ! मदीया रसवती **सण्ढिसप्तशत्या** समागतवती । साम्प्रतमियमवस्था । ततो मृतो दुःखेन । 87.32-34. cf. Deśī संढी; Guj. सॉंढ, सांढणी; Hindī साँडनी; Mar. सांड, साँडणी. *Vide* सण्ढियक.

सण्ढियक m. a dromedary-rider. तावता तद्विज्ञाय मह० देपाकेन मन्त्रिणः **सण्ढियकः** प्रहितः । स्नात्रावसरे **सण्ढियकमुत्सुकं** समागच्छन्तं वीक्ष्य मन्त्रिणा तेजःपालस्योक्तम्—इदं तव चरितमायाति । **सण्ढियकेन** सर्वमपि निवेदितम् । 75.7-11, तावता द्वितीय**सण्ढियकेनाभ्येत्य** स्वरूपं कथितमिति— 13. *Vide* सण्ढि.

√सत् (causal) to hide, to conceal. द्रव्यं क **सात्यते** ? —एवं विमृश्यतोः मध्यं दिनं जातम् । 57.7. cf. Old Guj. शांत-सांत 'to hide'. *Vide e.g.*:

> जेद्रथ **शांत्यो** भोंहरे, कौरवे दीधुं तालुं.
>
> —Pāṇḍavaviṣṭi of Phūḍha (17th cent. A.D.), line 448 ;
>
> शविता ढांक्यो चालणी, उटं लेइ **शांतुं** ओटि.
>
> —*Ibid.*, line 454.

Also cf. modern Guj. सांतवुं.

सत्रशाला f. an alm-house, a charity-house. 68.10, 26. *Vide* सत्राकार, सत्रागार, सत्रुकार.

सत्राकार m. *same as* सत्रशाला. 33.19 ; 65.25. *Vide* सत्रागार, सत्रुकार; also *vide* PK.

सत्रागार m. *same as* सत्रशाला. 8.33 ; 9.22 ; 57.22 ; 75.23. *Vide* सत्राकार, सत्रुकार ; also *vide* PC., PK.

सत्रुकार m. *same as* सत्राकार. पुनर्धने जाते तपोधनानां ? घृतघटं प्रतिदिनं **सत्रुकारो**ऽचारितः । सदा साधर्मिकवात्सल्यम् । 132.31-32. [This is fairly prevalent in Old Guj. in different forms. *Vide e.g.*:

> बीडुं लीधुं मंत्री धरि करे कामं जे ती इणि परि
> **सत्रुकार** रचइ चिहुं दिसि पुण्य प्ररुपइ एणइ मिसि
>
> —*Vikramacaritrarāsa* of Udayabhānu (1509 A.D.), verse 37 ;
>
> इसिउं सुणी दिओ दान अपार कुमर मंडावइ **सत्रुकार**
> गढमढ वापी कूप तठाक दि दक्षण रोपावइ बाग
>
> —*Ibid.*, verse 490 ;
>
> ते नगरीमांहिं **शत्रूकार**, कण केरा बहुला कोठार ।
> चउवीस प्रकारिइ मिलइ तिहां धान्य, परिपरिना अपूरव पान ॥
>
> —*Nala-Davadantī Rāsa* of Mahirāja (1556 A.D.), verse 97;
>
> राजसभाथी ऊठीउ रे, जाइ नगर मझारि ।
> चित्तिइ चिंता अति घणी रे, आविउ जिहां **शत्रूकार** ॥
> दान दीइ तिहां दवदंती रे, दीठी नलनी नारि ।
>
> —*Ibid.*, verses 709-710[ab];
>
> **शत्रुकार** ते मंडइ, छंडइ ए बहु भत्तपाण,
> श्रीवासुपूज्य ते नरवर, जिनवर दीक्षा जांणि.
>
> —*Vāsupūjya Manorama Phāga* of Kalyāṇa (1640 A.D.), verse 256 : *Prācīna Phāgu-Saṅgraha*, p. 197.]

Vide सत्रशाला, सत्रागार.

सप्तक्षेत्री f. the seven *Kṣetras* or items on which a lay-follower of Jainism is enjoined to spend his wealth. 33.26. [There is a poem entitled सप्तक्षेत्रिरासु in Old Guj. composed in V. S. 1327 (= 1271 A.D.) and published in the *Prācīna-Gurjara-Kāvyasaṅgraha*, G. O. Series No. 13, which describes how the wealth should be spent.]

सप्तवेलाः adv. for seven times. गुरुभिः पूर्ववद् कृत्वा प्रेषितः । तत्र तैः परावर्तितः । पुनर्गुरुसमीपे आयातः । तैस्तु बोधितः । एवं **सप्तवेला** एहिरे-याहिरांचक्रे । 106.27-28.

सप्तषण adj. (a spacious mansion) comprising seven apartments. 2.9. *Vide* षण for quotation.

सप्तानन m. the sun. 73.5.

सप्ति m. a horse. यः सप्तानमसप्तिसोदरयशाः सप्ताब्धिगम्भीरिमा 73.5.

समर्घविच(ह)रण n. luxurious meals (or meals served with due respect). मन्त्रिणोत्तारके कृते अनुपमदेव्यग्रे कथापितम्—यदेषां एकाकिनां विहरणं न विधेयम् । अपरे सर्वेऽपि विहृत्य गताः । .....अनायाते अनुपमदेव्या नगोदरं बन्धोः **समर्घविच(ह?)रणं** तेषां कारितम् । स्वयमवेले भोजनार्थमुपविष्टा । 63.16-18. *Vide* विहरण.

समवसरण n. an assembly gathered to listen to the sermon of a *Tīrthaṅkara*. तत्र **समवसरणानि** २५, श्रीशत्रुञ्जयतले वाटिका ३२,—65.11-12, तत्र २५ **समवसरणानि** पञ्चवर्णानि कारयित्वा श्रीसूरिभ्यः प्रदत्तानि । 16-17, ५०५ **समवसरणानि** पट्टसूत्रमयानि । 24; सम्पूर्णेषु ग्रन्थेषु शासनदेव्या पुस्तकलेखनाय रत्नखचिता स्वर्णमयी ऊतरी **समवसरणे** मुक्ता । 95.17-18. [Here the reference is to the पट or pictorial representation on cloth of such an assembly. A Jaina technical term.] *Vide* सम्+अव+√सृ; also *vide* PK.

सम्+अव+√सृ to arrive at. अन्यदा तस्मिन्पुरे सागरजिनः **समवसृतः** । 97.11, 19; श्रीआदिनाथे **समवसृते** Int. 29.14. [The verb is used to connote the arrival of a *Tīrthaṅkara* or a great Jaina pontiff at a particular place. A Jaina technical term.] *Vide* समवसरण; also *vide* PK.

समाता adj. m. together with the mother. नृपोऽपि राज्यं कुर्वन् **समाता**ऽस्ति (?) । 11.19.

समाधि m. meditative peace. पश्चात्सूरिपदमनुपाल्य **समाधिना** दिवं गतः ॥ 107.2. *Vide* PK.; also *vide* PC. समाधिमरण, PK. समाधिमृत्यु.

समारणा f. polishing and putting in order. प्रियङ्गुमञ्जरी कन्या पं० वेदगर्भः । अग्निसम्बन्धे कोपितः । पतिविलोकनाय वने, तृषा, पशुपालः, करचण्डी । योग्यं ज्ञात्वा गृहे आनीतः । षण्मासीं वपुः**समारणा** । स्वस्ति० । प्रधानमुहूर्ते नृपसभायाम् । क्षोभात् । उशरद् । नृपविस्मयम् । 116.14-16. cf. Pkt., Guj., Mar. समार in the sense of 'repairing, putting in order'. *Vide* स्मारण; also *vide* PC. समारचन.

समिति f. a careful behaviour in speaking, walking, etc. (*e.g.* भाषासमिति, ईर्यासमिति, etc.). 15.12. [A Jaina technical term.] *Vide* पञ्चसमिति; also *vide* PC.

सम्+उद्+√तॄ [1] to descend, to dismount. देवं मुत्कलाप्य स्वयमारात्रिकमाधाय सङ्घः **समुत्तीर्य** क्रमेण चलितः । 43.31-32.
[2] to alight from. स जलमार्गेणाश्वसहस्र २, मनुष्यसहस्र ५ समानीय समुद्रतटे **समुत्तीर्णः** । 56.9-10.
Vide उद्+√तॄ.

समुद्गक m. a covered box or casket. 8.18.

सम्बल m., n. provision for a journey, viaticum. तस्य चलतो द्वौ मोदकौ समर्पितौ **सम्बलार्थम्** । 111.8; 112.27. cf. Pkt. संबल.

सम्+√मील् (causal) to collect together, to mingle together. गोदावरीतटे नृपः कमलादित्यवचसा कटकं **सम्मील्य** चलितः 14.6; एकदा श्रीभोजराजेन दर्शनानि **सम्मील्य** उक्तम् 19.14; जनं **सम्मील्य** 30.24-25; सङ्घं **सम्मील्य** ततो गतः 32.27; 66.26; 67.8; 94.32; औषधानि **सम्मील्य** स्तम्भः कृतः

104.31. *Vide* √मील्; also *vide* PK. for a slightly different shade of sense.

सम्यक्त्व n. faith in true religion. चन्द्रयशासाध्वीसमीपे सुता **सम्यक्त्व**सारं धर्मं प्राप्यातीव सदाचारचतुरा बभूव । Int. 29.1-2. [A Jaina technical term.] *Vide* PK.

